श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

ओं नमो भगवते वासुदेवाय

महर्षि वेदव्यासप्रणीतं श्रीमद्भागवतमहापुराणम्

# ॥ अष्टमस्कन्धे सप्तमोऽध्यायः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

ओं नमो भगवते वासुदेवाय

# श्रीमद्भागवतमहापुराणम्

## ॥ अष्टमस्कन्धे सप्तमोऽध्यायः ॥

श्रीशुक उवाच
ते नागराजमामन्त्र्य फलभागेन वासुकिम्।
परिवीय गिरौ तस्मिन् नेत्रमब्धिं मुदान्विताः॥ 1 ॥

आरेभिरे सुसंयत्ता अमृतार्थे कुरूद्वह।
हरिः पुरस्ताज्जगृहे पूर्वं देवास्ततोऽभवन्॥ 2 ॥

तन्नैच्छन् दैत्यपतयो महापुरुषचेष्टितम्।
न गृह्णीमो वयं पुच्छमहेरङ्गममङ्गलम्॥ 3 ॥

स्वाध्यायश्रुतसम्पन्नाः प्रख्याता जन्मकर्मभिः।
इति तूष्णीं स्थितान् दैत्यान् विलोक्य पुरुषोत्तमः।
स्मयमानो विसृज्याग्रं पुच्छं जग्राह सामरः॥ 4 ॥

कृतस्थानविभागास्त एवं कश्यपनन्दनाः।
ममन्थुः परमायत्ता अमृतार्थं पयोनिधिम्॥ 5 ॥

मथ्यमानेऽर्णवे सोऽद्रिरनाधारो ह्यपोऽविशत्।
ध्रियमाणोऽपि बलिभिर्गौरवात्पाण्डुनन्दन॥ 6 ॥

ते सुनिर्विण्णमनसः परिम्लानमुखश्रियः।
आसन् स्वपौरुषे नष्टे दैवेनातिबलीयसा॥ 7 ॥

विलोक्य विघ्नेशविधिं तदेश्वरो
    दुरन्तवीर्योऽवितथाभिसन्धिः।
कृत्वा वपुः काच्छपमद्भुतं महत्
    प्रविश्य तोयं गिरिमुज्जहार॥ **8** ॥

तमुत्थितं वीक्ष्य कुलाचलं पुनः
    समुत्थिता निर्मथितुं सुरासुराः।
दधार पृष्ठेन स लक्षयोजन -
    प्रस्तारिणा द्वीप इवापरो महान्॥ **9** ॥

सुरासुरेन्द्रैर्भुजवीर्यवेपितं
    परिभ्रमन्तं गिरिमङ्ग पृष्ठतः।
बिभ्रत्तदावर्तनमादिकच्छपो
    मेनेऽङ्गकण्डूयनमप्रमेयः॥ **10** ॥

तथासुरानाविशदासुरेण
    रूपेण तेषां बलवीर्यमीरयन्।
उद्दीपयन् देवगणांश्च विष्णु -
    र्दैवेन नागेन्द्रमबोधरूपः॥ **11** ॥

उपर्यगेन्द्रं गिरिराडिवान्य
    आक्रम्य हस्तेन सहस्रबाहुः।
तस्थौ दिवि ब्रह्मभवेन्द्रमुख्यै -
    रभिष्टुवद्भिः सुमनोऽभिवृष्टः॥ **12** ॥

उपर्यधश्चात्मनि गोत्रनेत्रयोः
    परेण ते प्राविशता समेधिताः।
ममन्थुरब्धिं तरसा मदोत्कटा
    महाद्रिणा क्षोभितनक्रचक्रम्॥ **13** ॥

अहीन्द्रसाहस्रकठोरदृङ्मुख -
श्वासाग्निधूमाहतवर्चसोऽसुराः।
पौलोमकालेयबलील्वलादयो
दवाग्निदग्धाः सरला इवाभवन्॥ **14** ॥

देवांश्च तच्छ्वासशिखाहतप्रभान्
धूम्राम्बरस्रग्वरकञ्चुकाननान्।
समभ्यवर्षन् भगवद्वशा घना
ववुः समुद्रोर्म्युपगूढवायवः॥ **15** ॥

मथ्यमानात्तथा सिन्धोर्देवासुरवरूथपैः।
यदा सुधा न जायेत निर्ममन्थाजितः स्वयम्॥ **16** ॥

मेघश्यामः कनकपरिधिः कर्णविद्योतविद्यु -
न्मूर्ध्नि भ्राजद्विलुलितकचः स्रग्धरो रक्तनेत्रः।
जैत्रैर्दोर्भिर्जगदभयदैर्दन्दशूकं गृहीत्वा
मथ्नन् मथ्ना प्रतिगिरिरिवाशोभताथो धृताद्रिः॥ **17** ॥

निर्मथ्यमानादुदधेरभूद्विषं
महोल्बणं हालहलाह्वमग्रतः।
सम्भ्रान्तमीनोन्मकराहिकच्छपा -
त्तिमिद्विपग्राहतिमिङ्गिलाकुलात्॥ **18** ॥

तदुग्रवेगं दिशि दिश्युपर्यधो
विसर्पदुत्सर्पदसह्यमप्रति।
भीताः प्रजा दुद्रुवुरङ्ग सेश्वरा
अरक्ष्यमाणाः शरणं सदाशिवम्॥ **19** ॥

विलोक्य तं देववरं त्रिलोक्या
    भवाय देव्याभिमतं मुनीनाम्।
आसीनमद्रावपवर्गहेतो -
    स्तपो जुषाणं स्तुतिभिः प्रणेमुः ॥ 20 ॥

प्रजापतय ऊचुः
देवदेव महादेव भूतात्मन् भूतभावन।
त्राहि नः शरणापन्नांस्त्रैलोक्यदहनाद्विषात् ॥ 21 ॥

त्वमेकः सर्वजगत ईश्वरो बन्धमोक्षयोः।
तं त्वामर्चन्ति कुशलाः प्रपन्नार्तिहरं गुरुम् ॥ 22 ॥

गुणमय्या स्वशक्त्यास्य सर्गस्थित्यप्ययान् विभो।
धत्से यदा स्वदृग् भूमन् ब्रह्मविष्णुशिवाभिधाम् ॥ 23 ॥

त्वं ब्रह्म परमं गुह्यं सदसद्भावभावनः।
नानाशक्तिभिराभातस्त्वमात्मा जगदीश्वरः ॥ 24 ॥

त्वं शब्दयोनिर्जगदादिरात्मा
    प्राणेन्द्रियद्रव्यगुणस्वभावः।
कालः क्रतुः सत्यमृतं च धर्म -
    स्त्वय्यक्षरं यत्त्रिवृदामनन्ति ॥ 25 ॥

अग्निर्मुखं तेऽखिलदेवताऽऽत्मा
    क्षितिं विदुर्लोकभवाङ्घ्रिपङ्कजम्।
कालं गतिं तेऽखिलदेवतात्मनो
    दिशश्च कर्णौ रसनं जलेशम् ॥ 26 ॥

नाभिर्नभस्ते श्वसनं नभस्वान्
    सूर्यश्च चक्षूंषि जलं स्म रेतः।

परावरात्माश्रयणं तवात्मा
सोमो मनो द्यौर्भगवञ्छिरस्ते ॥ 27 ॥

कुक्षिः समुद्रा गिरयोऽस्थिसङ्घा
रोमाणि सर्वौषधिवीरुधस्ते ।
छन्दांसि साक्षात् तव सप्तधातव -
स्त्रयीमयात्मन् हृदयं सर्वधर्मः ॥ 28 ॥

मुखानि पञ्चोपनिषदस्तवेश
यैस्त्रिंशदष्टोत्तरमन्त्रवर्गः ।
यत् तच्छिवाख्यं परमार्थतत्त्वं
देव स्वयञ्ज्योतिरवस्थितिस्ते ॥ 29 ॥

छाया त्वधर्मोर्मिषु यैर्विसर्गो
नेत्रत्रयं सत्त्वरजस्तमांसि ।
साङ्ख्यात्मनः शास्त्रकृतस्तवेक्षा
छन्दोमयो देव ऋषिः पुराणः ॥ 30 ॥

न ते गिरित्राखिललोकपाल -
विरिञ्चवैकुण्ठसुरेन्द्रगम्यम् ।
ज्योतिः परं यत्र रजस्तमश्च
सत्त्वं न यद्ब्रह्म निरस्तभेदम् ॥ 31 ॥

कामाध्वरत्रिपुरकालगराद्यनेक -
भूतद्रुहः क्षपयतः स्तुतये न तत्ते ।
यस्त्वन्तकाल इदमात्मकृतं स्वनेत्र -
वह्निस्फुलिङ्गशिखया भसितं न वेद ॥ 32 ॥

ये त्वात्मरामगुरुभिर्हृदि चिन्तिताङ्घ्रि -
    द्वन्द्वं चरन्तमुमया तपसाभितप्तम्।
कत्थन्त उग्रपुरुषं निरतं श्मशाने
    ते नूनमूतिमविदंस्तव हातलज्जाः॥ **33** ॥

तत्तस्य ते सदसतोः परतः परस्य
    नाञ्जः स्वरूपगमने प्रभवन्ति भूम्नः।
ब्रह्मादयः किमुत संस्तवने वयं तु
    तत् सर्गसर्गविषया अपि शक्तिमात्रम्॥ **34** ॥

एतत्परं प्रपश्यामो न परं ते महेश्वर।
मृडनाय हि लोकस्य व्यक्तिस्तेऽव्यक्तकर्मणः॥ **35** ॥

श्रीशुक उवाच
तद्वीक्ष्य व्यसनं तासां कृपया भृशपीडितः।
सर्वभूतसुहृद्देव इदमाह सतीं प्रियाम्॥ **36** ॥

शिव उवाच
अहो बत भवान्येतत् प्रजानां पश्य वैशसम्।
क्षीरोदमथनोद्भूतात्कालकूटादुपस्थितम्॥ **37** ॥

आसां प्राणपरीप्सूनां विधेयमभयं हि मे।
एतावान् हि प्रभोरर्थो यद्दीनपरिपालनम्॥ **38** ॥

प्राणैः स्वैः प्राणिनः पान्ति साधवः क्षणभङ्गुरैः।
बद्धवैरेषु भूतेषु मोहितेष्वात्ममायया॥ **39** ॥

पुंसः कृपयतो भद्रे सर्वात्मा प्रीयते हरिः।
प्रीते हरौ भगवति प्रीयेऽहं सचराचरः।
तस्मादिदं गरं भुञ्जे प्रजानां स्वस्तिरस्तु मे॥ **40** ॥

श्रीशुक उवाच
एवमामन्त्र्य भगवान् भवानीं विश्वभावनः।
तद् विषं जग्धुमारेभे प्रभावज्ञान्वमोदत॥ **41** ॥

ततः करतलीकृत्य व्यापि हालाहलं विषम्।
अभक्षयन्महादेवः कृपया भूतभावनः॥ **42** ॥

तस्यापि दर्शयामास स्ववीर्यं जलकल्मषः।
यच्चकार गले नीलं तच्च साधोर्विभूषणम्॥ **43** ॥

तप्यन्ते लोकतापेन साधवः प्रायशो जनाः।
परमाराधनं तद्धि पुरुषस्याखिलात्मनः॥ **44** ॥

निशम्य कर्म तच्छम्भोर्देवदेवस्य मीढुषः।
प्रजा दाक्षायणी ब्रह्मा वैकुण्ठश्च शशंसिरे॥ **45** ॥

प्रस्कन्नं पिबतः पाणेर्यत्किञ्चिज्जगृहुः स्म तत्।
वृश्चिकाहिविषौषध्यो दन्दशूकाश्च येऽपरे॥ **46** ॥

॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
अष्टमस्कन्धे अमृतमथने सप्तमोऽध्यायः॥